# Muhurta chintamani

samskaraprakaranam

# सीमन्तमुहूर्तः

जीवारार्कदिने मृगेज्यनिर्ऋतिश्रोत्रादितिब्रध्नभैः
रिक्तामार्करसाष्टवर्ज्यतिथिभिर्मासाधिपे पीवरे ।
सीमन्तोऽष्टमषष्ठमासि शुभदैः केन्द्रत्रिकोणे खलै-
र्लाभारित्रिषु वा ध्रुवान्त्यसदहे लग्ने च पुंभांशके ॥ ८॥

# तत्र विशेषः - गर्भमासाधिपाः

मासेश्वराः सितकुजेज्यरवीन्दुसौरि-
चन्द्रात्मजास्तनुपचन्द्रदिवाकराः स्युः।
स्त्रीणां विधोर्बलमुशन्ति विवाहगर्भ-
संस्कारयोरितरकर्मसु भर्तुरेव ॥९॥

| माससंख्या | अधिपतिः |
| --- | --- |
| १ | शुक्रः |
| २ | कुजः |
| ३ | गुरुः |
| ४ | रविः |
| ५ | चन्द्रः |
| ६ | शनिः |
| ७ | बुधः |
| ८ | आधानलग्नाधिपः |
| ९ | चन्द्रः |
| १० | रविः |

# पुंसवनसंस्कारः

पूर्वोदितैः पुंसवनं विधेयं
मासे तृतीये त्वथ विष्णुपूजा ।
मासेष्टमे विष्णुविधातृजीवै-
र्लग्ने शुभे मृत्युगृहे च शुद्धे ॥ १०

पुम्सवनम्

- मास; — ३
- नक्षत्रम् — मृ,पु,मू,श्र,पुन,ह
- तिथिः — १-२-३-५-७-१०-११-१२-१३-१५
- वार; — रवि-कुज-गुरव;
- विशेषविधयः — शुभग्रहाः केन्द्रत्रिकोणयोः, पापाः ३-६-११ भावेषु, लग्नं पुरुषनवांशे च


## जातकर्मसंस्कारः नामकरणसंस्कारश्च -

तज्जातकर्मादि शिशोर्विधेयं

पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि ।

एकादशे द्वादशकेऽपि घस्त्रे

मृदुध्रुवक्षिप्रचरोडुषु स्यात्॥ ११ ॥


नामकरणम्
जातकर्म
----
तिथि;
११/१२
दिनम्
---
वार;
मृदुध्रुवक्षिप्रचराणि
नक्षत्रम्
----
मासः
-----
विशेषविधिः
वर्ज्यतिथयः
पर्वदिनानि रिक्तातिथयः च
१४-८-३०-१५
संक्रान्तिः
४-९-१४
वार;
शुभवाराः
चन्द्र-बुध-गुरु-शुक्रवाराः
नक्षत्रम्
मृदुध्रुवक्षिप्रचराणि
मासः
-- --
विशेषविधिः
---

# सूतिकास्नानमुहूर्तः

पौष्णध्रुवेन्दुकरवातहयेषु सूती-
स्नानं समित्रभरवीज्यकुजेषु शस्तम् ।
नार्द्रात्रयश्रुतिमघान्तकमिश्रमूल-
त्वाष्ट्रे ज्ञसौरिवसुषड्विरिक्ततिथ्याम् ॥ १२ ॥


# दन्तोत्पत्तिकालवशात् शुभाऽशुभफलानि

मासे चेत्प्रथमे भवेत्सदशनो बालो विनश्येत् स्वयं

हन्यात् स क्रमतोऽनुजातभगिनीमात्रग्रजान् द्व्यादिके।

षष्ठादौ लभते हि भोगमतुलं तातात्सुखं पुष्टतां


लक्ष्मीं सौख्यमथो जनौ सदशनो वोर्ध्वं स्वपित्रादिहा॥ १३ ॥



दन्तोत्पत्तिफलानि
शिशोः
मासवशात्
१ मासः
स्वयं विनश्यति
२ मासः
अनुजस्य कृते अनिष्टम्
३ मासः
भगिन्याः कृते अनिष्टम्
४ मासः
मातुः कृते अनिष्टम्
५ मासः
ज्येष्ठभ्रातुः कृते अनिष्टम्
६ मासः
भोगप्राप्तिः
७ मासः
पितृसुखप्राप्तिः
८ मासः
देहपुष्टिः
९ मासः
सम्पत्प्राप्तिः
१० मासः
सुखप्राप्तिः
जन्मकाले
पित्रादिभ्यः अनिष्टम्

# दोलारोहणमुहूर्तः

दोलारोहेऽर्कभात् पञ्च-शर-पञ्चेषु-सप्तभैः।
नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः१४॥


दोलारोहणम्
रविचक्रम्
रविस्थितं नक्षत्रम्
रोहिणी
5
रो,मृ,आर्, पुन,पु
नैरुज्यम्= रोगाभावः
5
आश्ले, म, पू, उत्त, ह
मरणम्
5
चि, स्वा, वि, अनू, ज्ये
आरोग्यहानिः
5
मू, पू.आ, उ.षा, श्र, ध
रोगः
7
शत, पू.भा, उ.भा, रे, अश्वि, भ, कृ
सौख्यम्

| **रविस्थितनक्षत्रात् नक्षत्रसंख्या (हस्तनक्षत्रे रविः अस्ति चेत्)** | **नक्षत्राणि** | **फलानि** |
|---|---|---|
| ५ | ह-चि-स्वा-वि-अनू | नैरुज्यम् |
| ५ | ज्ये-मू-पू.षा-उ.षा-श्र | मरणम् |
| ५ | ध-श-पू.भा-उ.भा-रे | कार्श्यम् |
| ५ | अ-भ-कृ-रो-मृ | व्याधिः |
| ७ | आर्-पुन-पु-आश्ले-म-पू-उ | सौख्यम् |

दन्तार्कभूपधृतिदिङ्मितवासरे स्यात्

वारे शुभे मृदु-लघु-ध्रुवभैः शिशूनाम् ।

दोलाधिरूढिरथ निष्क्रमणं चतुर्थे-

मासे गमोक्तसमयेऽर्कमितेऽह्नि वा स्यात्॥ १५॥

## मुहूर्तचिन्तामणिः

### संस्कारप्रकरणम्

संस्क्रियते अनेन जीवः इति संस्कारः। गुणान्तरोत्पादनम्=गुणविशेषाधानम्=सदुत्कर्षाधानं संस्कारः इत्युच्यते, तदर्थं यत्कर्म अथवा यः क्रियाकलापः भवति सः अपि संस्कारशब्दवाच्यः भवति । अस्माकं सनातनसम्प्रदाये मनुष्यस्य उत्पत्तेः मरणपर्यन्तं पूर्वषोडशसंस्काराः, मरणात्परम् अपरषोडशसंस्काराः च प्रोक्ताः सन्ति । तत्र पूर्वषोडशसंस्काराणां मुहूर्ताः अस्मिन् अध्याये प्रतिपादिताः सन्ति।

पूर्वषोडशसंस्काराः –

| | |
|---|---|
| १. गर्भाधानम् | ९. उपनयनम् |
| २. पुंसवनम् | १०. वेदव्रतम् - १ |
| ३. सीमन्तोन्नयनम् | ११. वेदव्रतम् - २ |
| ४. जातकर्म | १२. वेदव्रतम् - ३ |
| ५. नामकरणम् | १३. वेदव्रतम् - ४ |
| ६. उपनिष्क्रमणम् | १४. समावर्तनम् |
| ७. अन्नप्राशनम् | १५. विवाहः |
| ८. चूडाकरणम् | १६. अग्न्याधानम् |

तत्र एतेषु संस्कारेषु प्रथमः गर्भाधानम् । मनुष्यः शिशुरूपेण यदा मातुः गर्भे निवसति ततः प्रभृति अस्मिन् लोके तस्य जीवनयात्रा आरभ्यते। गर्भस्य समुद्भवे स्त्रियाः रजः, पुरुषस्य शुक्रं च कारणीभूतम्। स्त्री तदा एव गर्भं धर्तुं समर्था भवति यदा सा रजस्वला भवति। स्त्रियाः शरीरे प्रथमतयाः रजसः आविर्भावः यदा भवति तत्समयमाधारीकृत्य ज्योतिश्शास्त्रे फलानि उक्तानि सन्ति ।

**प्रथमरजोदर्शनसमयात् शुभाशुभफलचिन्तनक्रमः –**

**आद्यं रजः ….. सद्वारे सत्तनौ दिवा ॥ १ ॥**

माघ-मार्गशीर्ष-वैशाख-आश्वयुज-फाल्गुन-ज्येष्ठ-श्रावणमासेषु, शुक्लपक्षे, शुभग्रहाणां वासरे, शुभलग्ने, दिवाकाले च प्रथमरजोदर्शनं शुभं भवति।

**श्रुतित्रय……… परेष्वसत् ॥ २ ॥**

श्रवण-धनिष्ठा-स्वाती-शतभिषङ्नक्षत्रेषु, मृदु-क्षिप्र-ध्रुवसंज्ञकनक्षत्रेषु च प्रथमरजोदर्शनं शुभं भवति। तत्काले स्त्रिया श्वेतवर्णकं वस्त्रं धृतं चेत् शुभफलं वक्तव्यम् । मूल-पुनर्वसु-मघा-विशाखा-कृत्तिकानक्षत्रेषु प्रथमरजोदर्शनं चेत् मध्यमं फलम्। अन्येषु नक्षत्रेषु अर्थात् – पूर्वात्रय-भरणी-ज्येष्ठा-आर्द्रा-आश्लेषानक्षत्रेषु प्रथमरजोदर्शनम् अशुभं भवति ।

**भद्रानिद्रासङ्क्रमे ……….. नो रजोदर्शनं सत् ॥ ३ ॥**

भद्राकरणे, निद्रायाम्, सङ्क्रान्तिकाले, अमावास्या-रिक्ता-षष्ठी-अष्टमी-द्वादशीतिथिषु, सन्ध्याकाले, वैधृति-व्यतीपातयोगयोः, रविचन्द्रयोः ग्रहणकाले, स्त्रियाः ज्वरादिरोगेषु सत्सु च प्रथमरजोदर्शनम् अशुभं भवति ।

## गर्भाधानमुहूर्तः

**गण्डान्तं त्रिविधं त्यजेत् …… . पापभम् ॥ ५ ॥ भद्राषष्ठी…… सत् ॥ ६ ॥**

त्रिविधं गण्डान्तम् (तिथिगण्डान्तम्, लग्नगण्डान्तम्, नक्षत्रगण्डान्तं च), वधताराम्, जन्मनक्षत्रम्, मूल-भरणी-अश्विनी-रेवती-मघानक्षत्रदिनम्, ग्रहणदिनम्, वैधृति-व्यतीपातयोगदिनम्, परिघयोगस्य पूर्वार्धम्, मातुः पितुः च श्राद्धदिनम्, दिवाकालम्, सन्ध्याकालम्, उत्पातेन हतं नक्षत्रम्, जन्मराशितः अष्टमराशिलग्नम्, षष्ठी-भद्रा-रिक्तातिथीः, पर्वदिनानि, शनि-रवि-कुजवारान्, रजोदर्शनदिनात् चतस्रः रात्रीः च त्यक्त्वा अन्येषु कालेषु उत्तरात्रय-मृगशीर्ष-हस्त-अनूराधा-रोहिणी-स्वाती-श्रवण-धनिष्ठा-शतभिषङ्नक्षत्रेषु गर्भाधानम् अत्यन्तं शुभं भवति ।

**केन्द्रत्रिकोणेषु ……….. मध्यमं स्यात् ॥ ७ ॥**

चित्रा-पुनर्वसु-पुष्य-अश्विनीनक्षत्रेषु गर्भाधानं मध्यमफलदं भवति। गर्भाधानलग्नात् केन्द्रभावेषु त्रिकोणभावयोः च शुभग्रहाः, ३-६-११ भावेषु च पापग्रहाः यदि भवन्ति; लग्नोपरि पुरुषग्रहस्य (रविः कुजः गुरुः च पुरुषग्रहाः) दृष्टिः यदि स्यात्; चन्द्रः पुरुषराशिनवांशे यदि भवति, रजोदर्शनात् समसंख्याकरात्रौ (६,८,१०,१२,१४,१६ रात्रिषु) च यदि गर्भाधानं भवति तर्हि शुभं भवति ।

## सीमन्तोन्नयनमुहूर्तः

**जीवार्कारदिने … ……….. पुंभांशके ॥ ८ ॥**

गर्भाधानात् ६/८ मासे सीमन्तोन्नयनसंस्कारः विधेयः। तत्र, गुरु-रवि-कुजवासरेषु, मृगशीर्ष-पुष्य-मूल-श्रवण-पुनर्वसु-हस्तनक्षत्रेषु, रिक्ता-अमावास्या-द्वादशी-षष्ठी-अष्टमीतिथीः वर्जयित्वा अन्यासु तिथिषु, गर्भमासाधिपे बलिष्ठे, पुरुषराशौ पुरुषनवांशे वा लग्ने, लग्नात् केन्द्रत्रिकोणेषु शुभग्रहेषु, पापग्रहेषु ३-६-११ भावेषु च सत्सु सीमन्तोन्नयनं शुभं भवति।

**गर्भमासाधिपा – मासेश्वरा …….. इतरकर्मसु भर्तुरेव ॥ ९ ॥**

| माससंख्या | अधिपतिः | माससंख्या | अधिपतिः |
|---|---|---|---|
| १ | शुक्रः | ६ | शनिः |
| २ | कुजः | ७ | बुधः |
| ३ | गुरुः | ८ | गर्भाधानलग्नाधिपः |
| ४ | रविः | ९ | चन्द्रः |
| ५ | चन्द्रः | १० | रविः |

स्त्रीणां विवाहसंस्कारे गर्भसंस्कारे =गर्भाधान-पुंसवन-सीमन्तोन्नयनसंस्कारेषु चन्द्रबलं ताराबलं वा विशेषतया द्रष्टव्यम्। इतरसंस्कारेषु केवलं भर्तुः एव चन्द्रबलं द्रष्टव्यम् ।

## पुंसवनसंस्कारः

**पूर्वोदितैः पुंसवनं विधेयम् ....... शुद्धे ॥ १० ॥**

गर्भाधानात् तृतीये मासे पुंसवनसंस्कारः कर्तव्यः । सीमन्तोन्नयनोक्तमुहूर्ते एव (तत्र यानि नक्षत्राणि, ये वाराः, याः तिथयः, यत् लग्नम्, यादृशी ग्रहस्थितिश्च प्रोक्ता वर्तते तस्मिन् काले इत्यर्थः) । पुनः अष्टमे मासे, श्रवण-रोहिणी-पुष्यनक्षत्रेषु, शुभग्रहयुते लग्ने, लग्नात् अष्टमभावे शुद्धे च सति गर्भरक्षार्थं विष्णुपूजा कर्तव्या ।

## जातकर्म-नामकरणसंस्कारौ

**तज्जातकर्मादि ......... स्यात् ॥ ११ ॥**

शिशुजननात् परम् ११/१२ वा दिने एतौ संस्कारौ विधेयौ। रिक्तातिथीः पर्वदिनानि च वर्जयित्वा अन्यासु तिथिषु, शुभग्रहवासरे, मृदु-ध्रुव-क्षिप्र-चरसंज्ञकनक्षत्रेषु च जातकर्म नामकरणं च शुभं भवति।

**मासवशात् दन्तोत्पत्तिफलानि –**

**मासे चेत्प्रथमे ....... स्वपित्रादिहा ॥ १३ ॥**

जन्मकाले एव शिशोः दन्ताः यदि भवन्ति तर्हि पितुः मातुः वा अनिष्टं फलं भवति । जननात् परं प्रथमादिषु मासेषु क्रमेण दन्तोत्पत्तौ फलं यथा –

| माससंख्या | फलम् | माससंख्या | फलम् |
|---|---|---|---|
| १ | शिशोः अनिष्टम् | ६ | शिशोः सौख्यम् |
| २ | अनुजस्य अनिष्टम् | ७ | पितुः शुभम् |
| ३ | भगिन्याः अनिष्टम् | ८ | देहपुष्टिः |
| ४ | मातुः अनिष्टम् | ९ | ऐश्वर्यलाभः |
| ५ | ज्येष्ठस्य अनिष्टम् | १० | सुखम् |

**दोलारोहणमुहूर्तः -**

**दोलारोहे ..... ...... शिशोः ॥ १४ ॥**

जातं शिशुं दोलायाम् (शयनोपयोगिनी काष्ठादिमयी वाह्यखट्वा दोला इत्युच्यते) शाययन्ति। तदर्थं शुभाशुभचिन्तनं रविचक्रवशात् क्रियते। रविस्थितनक्षत्रात् चन्द्रस्थितनक्षत्रपर्यन्तं गणनया शुभम् अशुभं वा चिन्त्यते, यथा – रविस्थितनक्षत्रात् ५ नक्षत्रेषु चन्द्रनक्षत्रं चेत् आरोग्यवृद्धिः, तदग्रे ५ नक्षत्रेषु मरणसदृशं कष्टम्, तदग्रे ५ नक्षत्रेषु कृशता,

तदग्रे ५ नक्षत्रेषु रोगः, तदग्रे ७ नक्षत्रेषु सुखं च भवति । उदाहरणार्थं रविः हस्तनक्षत्रे अस्ति तर्हि दोलारोहः कदा शुभः भवति इति पश्यामः –

| | | | | | | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ |
| ह | चि | स्वा | वि | अ | ज्ये | मू | पू | उ | श्र | ध | श | पू | उ | रे | अ | भ | कृ | रो | मृ | आर् | पु | पु | आ | म | पू | उ |
| आरोग्यम् | | | | | मरणम् | | | | | कृशता | | | | | रोगः | | | | | सुखम् | | | | | | |

**दन्तार्कभूपधृति ............ दोलाधिरूढिः ॥ १५- पूर्वार्धम्**

जन्मदिनात् ३२/१२/१६/१८/१० दिने, शुभग्रहवासरे, मृदु-लघु-ध्रुवसंज्ञकनक्षत्रेषु दोलायां शिशोः आरोहणं कार्यम्।

## उपनिष्क्रमणमुहूर्तः

**..... अथ निष्क्रमणं चतुर्थमासे ....... वा स्यात् ॥ १५- उत्तरार्धम्**

जन्मकालात् चतुर्थे मासे अथवा जन्मदिनात् द्वादशे दिने उपनिष्क्रमणसंस्कारः कर्तव्यः। यात्राप्रकरणोक्ते यात्रामुहूर्ते एव उपनिष्क्रमणं कार्यम् ।

## अन्नप्राशनमुहूर्तः –

**रिक्तानन्दाष्टदर्शम् ......... अन्नाशनं सत् ॥ १७ ॥**

बालकानां षष्ठात् मासात् समे मासे (६/८/१० मासे), बालिकानां तु पञ्चमात् मासात् विषमे मासे (५/७/९ मासे) अन्नप्राशनं विधेयम्। रिक्ता-नन्दा-अष्टमी-द्वादशी-अमावास्यातिथीः, शनि-रवि-कुजवासरान्, मेष-वृश्चिक-मीन-जन्म-जन्माष्टमराशिलग्नानि च वर्जयित्वा अन्येषु तिथिवारलग्नेषु; तथा च मृदु-लघु-चर-स्थिरनक्षत्रेषु अन्नप्राशनसंस्कारः कर्तव्यः।

## कर्णवेधमुहूर्तः –

**हित्वैतांश्चैत्र............ कर्णवेधः प्रशस्तः ॥ २४ ॥ संशुद्धे मृतिभवने ......... शुभावहः स्यात् ॥ २५ ॥**

जन्मदिनात् द्वादशे षोडशे वा दिने/ जन्ममासात् षष्ठे सप्तमे अष्टमे वा मासे / जन्मतः विषमवर्षे वा कर्णवेधः विहितः। तत्र विशेषतः चैत्र-पौषमासौ, क्षयतिथिः, विष्णोः शयनदिनानि (चातुर्मास्यकालः = आषाढमासस्य शुक्लपक्षस्य एकादशीतः कार्तिकमासस्य शुक्लपक्षस्य एकादशीपर्यन्तम्), समवर्षम्, जन्ममासः च कर्णवेधे त्याज्याः।

चन्द्र-बुध-गुरु-शुक्रवासरेषु, श्रवण-धनिष्ठा-पुनर्वसुनक्षत्रेषु, मृदु-लघुसंज्ञकनक्षत्रेषु च कर्णवेधः शुभः भवति। पुनः वृष-तुला-धनुर्मीनानाम् अन्यतमे राशौ लग्ने तस्मिन् च गुरौ, लग्नात् अष्टमे भावे शुद्धे, १-४-७-१०-५-९-३-११ भावेषु शुभग्रहेषु सत्सु, ३-६-११ भावेषु पापेषु च सत्सु कर्णवेधः शुभप्रदः भवति।

**सामान्यतः केषुचित् संस्कारेषु त्याज्याः कालाः –**

**गीर्वाणाम्बुप्रतिष्ठा ..................... यावदीक्षां तदुग्रे ॥ २६ ॥**

दक्षिणायनकाले (कर्कसङ्क्रान्तितः मकरसङ्क्रान्तिपर्यन्तं ६ मासात्मकः कालः), गुरु-शुक्रयोः वार्धक्य-अस्त-बाल्यकालेषु च देवप्रतिष्ठा-जलाशयारम्भ-विवाह-अग्न्याधान-चूडाकर्म-उपनयन-राज्याभिषेक-गृहप्रवेशनानि शुभानि न भवन्ति । तथैव धूमकेतुदर्शने अशुभोत्पाते च सति १५ दिनपर्यन्तं सप्ताहपर्यन्तं वा शुभकार्याणि न कार्याणि।

**गुरुशुक्रयोः बाल्य-वार्धक्यकालौ –**

**पुरः पश्चात् ........ पक्षमुदाहृते ॥ २७ ॥**

- शुक्रः पूर्वस्यां दिशि उदितः चेत् ततः परं ३ दिनानि तस्य बाल्यकालः ।
- शुक्रः पश्चिमायां दिशि उदितः चेत् ततः परं १० दिनानि तस्य बाल्यकालः ।
- शुक्रः पूर्वस्यां दिशि अस्तमितः चेत् ततः पूर्वं १५ दिनानि तस्य वार्धक्यकालः
- शुक्रः पश्चिमायां दिशि अस्तमितः चेत् ततः पूर्वं ५ दिनानि तस्य वार्धक्यकालः ।
- गुरोः बाल्यकालः उदयात् परं १५ दिनानि, वार्धक्यकालः अस्तात् पूर्वं १५ दिनानि च भवन्ति ।

(शुक्रः रवितः कदाचित् अधिकगतिकः, कदाचित् अल्पगतिकश्च भवति इत्यतः पूर्वस्यां पश्चिमायां च अस्तोदयौ भवतः। परन्तु गुरुः सर्वदा रवितः अल्पगतिकः एव भवति इत्यतः अयं सर्वदा पूर्वस्याम् उदेति पश्चिमायाम् अस्तमेति।)

## चूडाकरणसंस्कारः –

**चूडा वर्षात् तृतीयात् ........ आयषड्त्रिस्थपापैः ॥ २९ ॥**

जन्मतः तृतीयात् विषमे वर्षे चूडाकरणसंस्कारः कर्तव्यः। प्रतिपत्-षष्ठी-अष्टमी-द्वादशी-रिक्तातिथीः पर्वदिनानि च हित्वा अन्यासु तिथिषु, चैत्रमासं त्यक्त्वा अन्येषु उत्तरायणमासेषु, चन्द्र-बुध-गुरु-शुक्राणां वासरे, तेषां राशौ तन्नवांशे च लग्ने, जन्मराशिं जन्माष्टमराशिं च लग्नत्वेन वर्जयित्वा अन्यराशौ लग्ने, लग्नात् अष्टमभावे शुद्धे, पापग्रहेषु ३-६-११ भावेषु सत्सु, ज्येष्ठा-मृगशीर्ष-चित्रा-रेवतीनक्षत्रेषु, चर-लघुसंज्ञकनक्षत्रेषु च चूडाकरणं शुभं भवति।

**अक्षरारम्भमुहूर्तः –**

**गणेशविष्णुवाग्रमाः ……… सतां दिने ॥ ३७ ॥**

शिशोः पञ्चमे वर्षे अक्षरारम्भः कर्तव्यः। उत्तरायणकाले, अश्विनी-हस्त-पुष्य-श्रवण-स्वाती-रेवती-पुनर्वसु-आर्द्रा-चित्रा-अनूराधानक्षत्रेषु, ११,१२,१०,२,६,५,३ एतासु तिथिषु, चरराशिलग्नं त्यक्त्वा अन्यराशौ तत्रापि शुभग्रहराशौ लग्ने, शुभग्रहाणां वासरे च गणेश-विष्णु-सरस्वती-लक्ष्मीः देवताः पूजयित्वा शिशोः अक्षराभ्यासः कारयितव्यः।

**विद्यारम्भमुहूर्तः –**

**मृगात्करात् ………… स्मृता ॥ ३८ ॥**

मृगशीर्ष-आर्द्रा-पुनर्वसु-हस्त-चित्रा-स्वाती-श्रवण-धनिष्ठा-शतभिषक्-अश्विनी-मूल-पूर्वात्रय-पुष्य-आश्लेषानक्षत्रेषु, (केषाञ्चन आचार्याणां मते उत्तरात्रय-रोहिणी-रेवती-अनूराधानक्षत्राणि अपि विद्यारम्भे शुभानि) रवि-गुरु-बुध-शुक्राणां वासरे, ६-५-३-११-१२-१०-२ तिथिषु, शुभग्रहेषु केन्द्र-त्रिकोणेषु च सत्सु विद्यारम्भः शुभावहः।

## उपनयनसंस्कारः-

**उपनयनकालः –**

**विप्राणां व्रतबन्धनम् ……….. बुधाः ॥ ३९ ॥**

गर्भात् जन्मनः कालात् वा उपनयनकालस्य निर्णयः कृतः। तत्र ब्राह्मणानां ५/८ वा वर्षे, क्षत्रियाणां ६/११ वा वर्षे, वैश्यानां ८/१२ वा वर्षे व्रतबन्धनं=उपनयनं कार्यम् ।

**क्षिप्रध्रुवाहि …….. न चापराह्णे ॥ ४० ॥**

क्षिप्र-ध्रुव-चर-मृदुसंज्ञकनक्षत्रेषु,आश्लेषा-मूल-पूर्वात्रय-आर्द्रानक्षत्रेषु च, रवि-बुध-गुरु-शुक्र-चन्द्राणां वासरेषु, शुक्लपक्षे २-३-५-११-१२-१० तिथिषु, कृष्णपक्षे २-३-५ तिथिषु च उपनयनं कर्तव्यम्। तत्र विशेषतः उपनयनाय अपराह्णकालात् पूर्वकालः अत्यन्तं प्रशस्तः ।

**कवीज्यचन्द्रलग्नपाः ………… सुते खलाः ॥४१ ॥ व्रतबन्धे ……….. विधुस्तनौ ॥ ४२ ॥**

- उपनयनकालिकलग्नात् लग्नाधिपतिः शुक्रः गुरुः चन्द्रः वा षष्ठ-अष्टमभावयोः न भवेत्।
- लग्नात् व्ययभावे चन्द्रः शुक्रो वा न भवेत् ।
- पापग्रहः लग्ने पञ्चमे अष्टमे वा न भवेत् ।
- शुभग्रहाः ६/८/१२ भावेभ्यः अन्यत्र भावेषु भवेयुः।
- पापग्रहाः ३/६/११ भावेषु भवेयुः।

- वृषभराशौ कर्कराशौ वा उपनयनकालिकलग्ने, तत्र पूर्णचन्द्रे सति अत्यन्तं शुभं भवति ।

**वेदशाखाधिपाः ग्रहाः –**

**शाखेशाः स्युर्जीवशुक्रारसौम्याः ॥ ४३ ॥**

ऋग्वेदाधिपः - गुरुः । यजुर्वेदाधिपः – शुक्रः । सामवेदाधिपः – कुजः । अथर्ववेदाधिपः – बुधः ।

तत्तद्वेदाध्यायिनां जनानाम् उपनयने तदधिपतेः ग्रहस्य बलम्, तस्य वारः, तद्राशिलग्नं च मुख्यतया द्रष्टव्यं भवति ।

**गुरुबलनिर्णयः –**

**वटुकन्याजन्मराशेः .......... निन्दितः ॥ ४६ ॥ स्वोच्चे स्वभे ....... ....... शुभोऽप्यसत् ॥ ४७ ॥**

जन्मराशितः ५-९-११-२-७ भावेषु गोचररीत्या (चारवशात्) गुरुः भवति चेत् शुभम्। १०-६-३-१ भावेषु चेत् मध्यमम्। ४-८-१२ भावेषु चेत् अधमम्। अर्थात् – तत्काले गुरुः मनुष्यस्य जन्मराशितः ५-९-११-२-७ भावेषु यदि स्यात् तर्हि तस्य गुरुबलं पूर्णम् अस्ति इति, १०-६-३-१ भावेषु यदि स्यात् तर्हि गुरुबलं मध्यमम् अस्ति इति, ४-८-१२ भावेषु यदि स्यात् तर्हि गुरुबलं नास्ति इति च अवगन्तव्यम्।

परन्तु जन्मराशितः ४-८-१२ भावस्थः अपि गुरुः उच्चराशौ, स्वक्षेत्रे, मित्रक्षेत्रे, स्वनवांशे, वर्गोत्तमनवांशे वा यदि स्यात् तर्हि शुभफलदायकः भवति। एवमेव ५-९-११-२-७ भावेषु १०-६-३-१ भावेषु वा स्थितः अपि यदि नीचराशौ शत्रुक्षेत्रे वा स्यात् तर्हि अशुभफलदायकः भवति ।

**उपनयने निन्दितः कालः –**

**कृष्णे प्रदोषे ....... .... व्रतबन्धो गलग्रहे ॥ ४८ ॥**

कृष्णपक्षः, प्रदोषः, अनध्यायदिनानि, शनिवासरः, अपराह्ण-रात्रिकालौ, दुर्दिने, गलग्रहदिने च उपनयनं न कर्तव्यम् ।

**अनध्यायकालः –**

**शुचिशुक्रपौषतपसाम् ...... .. व्रतेष्वनध्यायाः ॥ ५४ ॥**

- आषाढशुक्ल-दशमी, ज्येष्ठशुक्ल-द्वितीया, पौषशुक्ल-एकादशी, माघशुक्ल-द्वादशी चैताः चतस्रः तिथयः ।
- शुक्लपक्षे – प्रतिपत्, अष्टमी, चतुर्दशी, पूर्णिमा ; कृष्णपक्षे – प्रतिपत्, अष्टमी, चतुर्दशी, अमावास्या चेति प्रतिमासं अष्टौ तिथयः ।
- रविसङ्क्रान्तिदिनम् ।

एतानि अनध्यायत्वेन स्वीक्रियन्ते ।

**प्रदोषकालः –**

**अर्कतर्कत्रितिथिषु .......... क्रमात् ॥ ५५ ॥**

१२,६,३ तिथिषु क्रमेण रात्र्यर्ध-सार्धप्रहर-यामध्यकाले १३,७,४ तिथयः यदि भवन्ति तर्हि सः प्रदोषकालः इत्युच्यते । अर्थात् द्वादश्याम् अर्धरात्रिकाले त्रयोदशी तिथिः यदि आगच्छति तर्हि प्रदोषः, षष्ठ्यां सार्धप्रहरकाले सप्तमी यदि आगच्छति तर्हि प्रदोषः, तृतीयायां याममध्यकाले चतुर्थी यदि आगच्छति तर्हि प्रदोषः इति ।

**ऋग्वेदादिक्रमेण उपनयनयोग्यनक्षत्राणि -**

**वेदक्रमात् ......... सत् ॥ ५७ ॥**

ऋग्वेदिनाम् – मृगशीर्ष-आर्द्रा-आश्लेषा-हस्त-चित्रा-स्वाती-मूल-पूर्वात्रयनक्षत्रेषु

यजुर्वेदिनाम् – रेवती-हस्त-अनूराधा-मृगशीर्ष-पुनर्वसु-पुष्य-उत्तरात्रय-रोहिणीनक्षत्रेषु

सामवेदिनाम् – अश्विनी-धनिष्ठा-पुष्य-हस्त-उत्तरात्रय-आर्द्रा-श्रवणनक्षत्रेषु

अथर्ववेदिनाम् – मृगशीर्ष-रेवती-हस्त-अश्विनी-पुष्य-अनूराधा-धनिष्ठा-पुनर्वसुनक्षत्रेषु – उपनयनं शुभं भवति।

**केशान्तसमावर्तनसंस्कारौ-**

**केशान्तम् .......... समावर्तनमिष्यते ॥ ६० ॥**

षोडशे वर्षे चूडाकरणोक्तमुहूर्ते एव केशान्तसंस्कारः (वेदव्रतसंस्कारः) विधेयः । तदनन्तरम् उपनयनोक्तमुहूर्ते एव समावर्तनसंस्कारः कर्तव्यः ।

॥ इति मुहूर्तचिन्तामणौ संस्कारप्रकरणम् ॥